# Shivastuti by Parvati

# पार्वतीप्रोक्तं रौद्रनामेन शिवस्तुतिः

## Document Information

Text title : Shivastutih by Parvati

File name : shivastutiHpArvatIproktA.itx

Category : shiva, stuti, shivarahasya

Location : doc_shiva

Author : Traditional

Transliterated by : DPD

Proofread by : DPD, Ruma Dewan

Description-comments : || shrIshivarahasyam | bhargAkhye panchamAMshaH | adhyAyaH 40| 153-166 ||

Latest update : July 1, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 1, 2023

*sanskritdocuments.org*

# पार्वतीप्रोक्तं रौद्रनामेन शिवस्तुतिः

(शिवगौरीसंवादे)
श्रीपार्वती -
चण्डांशुशीतांशुहुताशनेत्रं चक्षुःश्रवापारविलोलहारम् ।
चर्माम्बरं चन्द्रकलावतंसं चराचरस्थं चतुराननेड्यम् ॥ १५३॥

विश्वाधिकं विश्वविधानदक्षं विश्वेश्वरं विश्रुतनामसारम् ।
विनायकेड्यं विधिविष्णुपूज्यं विभुं विरूपाक्षमजं भजेऽहम् ॥ १५४॥

मधुमथनाक्षिवराब्जपूज्यपादं मनसिजतनुनाशनोत्थदीप्तमन्युम् ।
मम मानसपद्मसद्मसंस्थं मतिदाने निपुणं भजामि शम्भुम् ॥ १५५॥

हरिं हरन्तमनुयन्ति देवा नखैस्तथा पक्षवातैः सुघोणैः ।
नृसिंहमुग्रं शरभाकृतिं शिवं मत्तं तदा दानवरक्तपानात् ॥ १५६॥

नखरमुखरघातैस्तीक्ष्णया दंष्ट्रयापि
    ज्वरपरिकरदेहे नाश्वतापैः सुदीप्ते ।
दितिजकदनमत्तं संहरन्तं जगच्च
    हरिमसुरकुलघ्नं देवतुष्ट्यै महेशः ।
परशुवरनिखातैः क्रोडमुन्क्रोष्टुमीष्टे ॥ १५७॥

- -
रौद्रनामभिरीशानं स्तुत्वाऽथ जगदम्बिका ।
प्रेमाश्रुपुलका देवं सा गाढं परिषस्वजे ॥ १५८॥

शौनकः -
कानि रौद्राणि नामानि त्वं नो वद विशेषतः ।
न तृप्तिरीशचरितं श्रृण्वतां नः प्रसीद भो ॥ १५९॥

सूतः -
तान्यहं वो वदाम्यद्य श्रृणुष्वं शौनकादयः ।

पवित्राणि विचित्राणि देव्या प्रोक्तानि सत्तमाः ॥ १६०॥

- -
देवी -
दिशाम्पतिः पशुपतिः पथीनां पतिरीश्वरः ।
अन्नानां च पतिः शम्भुः पुष्टानां च पतिः शिवः ॥ १६१॥

जगतां च पतिः सोमः क्षेत्राणां च पतिर्हरः ।
वनानां पतिरीशानो वृक्षाणां च पतिर्भवः ॥ १६२॥

आव्याधिनीनां च पतिः स्नायूनां च पतिर्गुरुः ।
पत्तीनां च पतिस्ताम्रः सत्वनां च पतिर्भवः ॥ १६३॥

आरण्यानां पतिः शम्भुर्मुष्णतां पतिरुष्णगुः ।
प्रकृतीनां पतिश्चेशः कुलुञ्चानां पतिः समः ॥ १६४॥

रुद्रो गृत्सपतिर्व्रात्यो भगीरथपतिः शुभः ।
अन्धसाम्पतिरीशानः सभायाः पतिरीश्वरः ॥ १६५॥

सेनापतिश्च श्वपतिः सर्वाधिपतये नमः ।
प्रणता विनता तवाङ्घ्रिपद्मे भगवन्परिपाहि मां विभो त्वम् ।
तव कारुण्यकटाक्षलेशलेशैर्मुदिता शङ्कर भर्ग देवदेव ॥ १६६॥

॥ इति शिवरहस्यान्तर्गते भर्गाख्ये पञ्चमांशे शिवगौरीसंवादे
पार्वतीप्रोक्तं रौद्रनामेन शिवस्तुतिः सम्पूर्णा ॥

- ॥ श्रीशिवरहस्यम् । भर्गाख्यः पञ्चमांशः । अध्यायः ४०। १५३-१६६॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 40. 153-166..

Notes-
Parvati recites Shiva Stuti composed of
various names of Rudra.

*Shivastuti by Parvati*

pdf was typeset on July 1, 2023

Please send corrections to *sanskrit@cheerful.com*